अनुशासनं, क्ली, (अनु + शास् + भावे ल्युट्।) आदेशः। आज्ञा। यथा,—
"इत्येते ब्रह्मणः पुत्त्रा आश्रुत्यात्मानुशासनं"।
इति श्रीभागवतं॥ व्युत्पादनं। यथा नामलिङ्गानुशासनमित्यमरः॥ (उपदेशः। नियोगकरणं।
"अहिंसयैव भूतानां कार्य्यं श्रेयोनुशासनम्"।
इति मनुः।)

अनुशीलनं, क्ली, (अनु पौनःपुन्येन शीलनमभ्यासः, अनु + शीलि + भावे ल्युट्।) पुनःपुनरभ्यासः। मुहुः सेवनं। यथा,—
"आनुकूल्येन कृष्णानुशीलनं भक्तिरुत्तमा"।
इति भक्तिरसामृतसिन्धुः॥

अनुशोचनं, क्ली, (अनु + शुच् + भावे ल्युट्।) अनुशोचना। तत्पर्य्यायः। मन्युः २ शोकः ३ शुक् ४। इति जटाधरः॥

अनुषङ्गः, पुं, (अनु + सन्ज + भावे घञ्।) कारुण्यं। दया। इति हलायुधः॥ एकत्रान्वितपदस्यान्यत्रान्वयः। यथा। कोषोबलञ्चापहृतमित्यादौ बलान्वितापहृतस्य कोषेऽन्वयः॥ न्याये उपनयस्थायम्पदस्य निगमनेऽनुषङ्गः। यथा। वह्निव्याप्यधूमवांश्चायं तस्माद्वह्निमान्॥ प्रसङ्गः। अन्योद्देशेन प्रवृत्तावन्यस्यापि सिद्धिः। यथा,—
"नित्यक्रियां तथा चान्ये ह्यनुषङ्गफलां श्रुतिं"।
इति स्मृतिः॥

अनुष्टुप्, [भ्] स्त्री, (अनु सततं स्तुभ्यतेऽनया, अनु + स्तुन्भ + क्विप् षत्वं।) सरस्वती। इति शब्दरत्नावली॥ अष्टाक्षरपदं छन्दः। सा तु समार्द्धसमविषमवृत्तभेदेन त्रिधा तत्र शेषस्य प्रायिकप्रयोगः। तस्य लक्षणं।
"पञ्चमं लघु सर्व्वत्र सप्तमं द्विचतुर्थयोः।
गुरु षष्ठन्तु पादानां शेषेष्वनियमो मतः"॥
इति छन्दोमञ्जरी॥ अस्याः प्रस्ताराः २५६। इति पिङ्गलः॥

अनुष्ठानं, क्ली, (अनु + स्था + भावे ल्युट्)। कर्म्मारम्भः। करणं। यथा,-
"कृता श्रीभवदेवेन कर्म्मानुष्ठानपद्धती"।
(उपपादनं। व्यवस्थापनं। उपयोगिता। आनुरूप्यं। कार्य्यकरणं। अभ्यासः। अनुशीलनं। चर्च्चा।
"उपपत्तिपरित्यक्तशास्त्रानुष्ठानमोहितैः"।
इति राजतरङ्गिणी।
"अस्य नित्यमनुष्ठानं सम्यक् कुर्य्यादतन्द्रित"।
इति मनुः। शास्त्रविहितकर्त्तव्यादिसम्पादनम्।
"किन्त्वनुष्ठाननित्यत्वं स्वातन्त्र्यमपकर्षति"।
इति उत्तरचरिते।)

अनुष्णं, क्ली, (न उष्णं नञ्समासः।) उत्पलं। इति राजनिर्घण्टः॥

अनुष्णः, त्रि, (न उष्णः, नञ्समासः।) अलसः। इत्यमरः॥ उष्णभिन्नः शीतलः बहुव्रीहौ तु अल्पोष्णः॥

अनुष्णवल्लिका, स्त्री, (अनुष्णा शीतला वल्लीव कर्म्मधारयः।) नीलदूर्व्वा। इति राजनिर्घण्टः॥

अनुसन्धानं, क्ली, (अनु + सम् + धा भावे ल्युट्।) अन्वेषणं। चेष्टा। इत्यादिकाव्यानुसन्धानबलादिति काव्यप्रकाशः॥

अनुसारः, पुं, (अनु + सृ + भावे घञ्।) अनुसरणं। अनुयानं। अनुक्रमः। यथा,—
"अथ लौहविधिं वक्ष्ये लौहशास्त्रानुसारतः"।
इति वैद्यकसुखबोधः॥

अनुहार,पुं, (अनु + हृ + घञ्।) अनुकारः। सदृशीकरणं। सदृशरूपवेशभाषाद्याविष्करणं। इत्यमरः॥ उपमा। इति हेमचन्द्रः॥
("तद्रूपाननुहारस्तु हेतौ सत्यप्यतद्गुणः"।
इति साहित्यदर्पणे।)

अनुक्षणं, क्ली, (क्षणे क्षणे वीप्सायामव्ययीभावः।) प्रतिक्षणं। सर्व्वदा। अनवरतं। क्षणशब्दस्य वीप्सार्थानुपसर्गेणाव्ययीभावसमासः॥

अनूकं,क्ली, (अनु + उच् + घञर्थे कः, न्यङ्क्वादीनाञ्च इति कुत्वम्।) कुलं। वंशः। शीलं। स्वभावः। इति मेदिनी॥

अनूकः,पुं, (अनु + उच् + घञर्थे कः, न्यङ्क्वादीनाञ्च इति कुत्वम्।) गतजन्म। पूर्व्वजन्म। इति मेदिनी॥ (वंशः। कुलं। स्वभावः। शीलं।
"अनूकं तु कुले शीले पुंसि स्यात् गतजन्मनि"।
इति मेदिनी।)

अनूचानः, पुं, (अनु + ब्रु + लिट् तस्य कानच्।) साङ्गवेदविचक्षणः। शिक्षादिषड़ङ्गसहितवेदवेत्ता। इत्यमरः॥
("इदमूचुरनूचानाः प्रीतिकण्टकितत्वचः"।
इति कुमारसम्भवे।
"ऋषयश्चक्रिरे धर्म्मं योऽनूचानः स नो महान्"।
इति मनुः।)

अनूचानः, त्रि, (अनु + वच् + लिट् तस्य कानच्। वेदस्यानुवचनं कृतवान्, उपेयिवानित्यादिना साधु।) विनीतः। सविनयः। इति मेदिनी॥ (साङ्गवेदविचक्षणः।
"अनूचानो विनीते स्यात् साङ्गवेदविचक्षणे"।
इति मेदिनी॥
शिक्षाकल्पादिषड़ङ्गसहितवेदाध्ययनकारी, यथा,
"इदमूचुरनूचानाः प्रीतिकण्ठकितत्वचः"।
इनि कुमारसम्भवे।
"ऋषयश्चक्रिरे धर्म्मं योऽनूचानः स नो महान्"।
इति मनुः)॥

अनूढ़ः, त्रि, (वह + कर्म्मणि क्तः संप्रसारणं ततो नञ्समासः।) अविवाहितः। आइवड़ इति भाषा। यथा,—
"परिवेत्तानुजोऽनूढ़े ज्येष्ठे दारपरिग्रहात्"।
इत्यमरः॥

अनूद्यं, त्रि, (अनु + वद् + क्यप् संप्रसारणं।) अनुवाद्यं। अनुवदनीयं। अवदनीये कृत्यमध्यं। इति संक्षिप्तसारव्याकरणं॥

अनूनं,त्रि (न ऊनं, नञ्समासः।) अखण्डं। समग्रं। पूर्णं। इति जटाधरः॥ (अहीनः। अन्यूनः।
"इमामनूनां सुरभेरवेहि"। इति रघुवंशे।)

अनूनकं,त्रि, (न ऊनं, नञ्समासः, ततः स्वार्थे कन्।) सकलं। पूर्णं। अखण्डं। इत्यमरः॥

अनूपं, त्रि, (अनुगता आपोऽत्र, समासान्त अच्, अस्य उत्वं।) जलबहुलदेशः। जलप्लावितस्थानं। तत्पर्य्यायः। जलप्रायं २। इत्यमरः॥ अस्य गुणाः। शीतलत्वं। स्निग्धत्वं। वातश्लेष्मकारित्वं। गुरुत्वञ्च। इति राजवल्लभः॥ एतद्देशीयजलगुणाः। गुरुत्वं॥ घनत्वं। पिच्छिलत्वं। मधुरत्वं। श्लेष्मजनकत्वं। स्निग्धत्वं। अग्निनाशित्वं। प्रमेहगलगण्डश्लीपदच्छर्द्दिप्रभृतिरोगकारित्वञ्च। इति राजनिर्घण्टः॥

अनूपः, पुं, (अनुगता आपोऽत्र, प्रादिभ्यो धातुजस्य वाच्योवाचोत्तरपदलोपश्चेति बहुव्रीहिः) महिषः। इति त्रिकाण्डशेषः॥ (जलप्रायः। जलबहुलः। बह्वम्बुयुक्तः। "अनूपो महिषे नाम्बुप्रायदेशे तु वाच्यवत्"। इति मेदिनी॥)

अनूपजं, क्ली, (अनूपे जलप्रायदेशे जायते, अनूप + जन् + डः उपपदसमासः।) आर्द्रकं। इति राजनिर्घण्टः॥

अनूपदेश, पुं, (अनूपः जलप्रायः देशः कर्म्मधारयः।) जलप्रायदेशः। तस्य लक्षणं यथा,—
"नदीपल्वलशैलाद्यफुल्लोत्पलकुलैर्युतः।
हंससारसकारण्डचक्रवाकादिसेवितः॥
सरोवराहमहिषखररोहिकुलाकुलः।
प्रभूतद्रुमसुख्याढ्यो नानाशस्यफलान्वितः॥
अनेकशालिकेदारकदलीक्षुविभूषितः।
अनूपदेशो ज्ञातव्यो वातश्लेष्ममयार्त्तिमान्"॥
इति भावप्रकाशः॥

अनूरुः, पुं, (नास्ति ऊरू यस्य सः।) सूर्य्यसारथिः। अरुणः। इत्यमरः॥ (ऊरुहीनः।)॥

अनूरुसारथिः, पुं, (अनूरुः अरुणः सारथिः रथचालको यस्य सः।) सूर्य्यः। यथा,—
"गतं तिरश्चीनमनूरुसारथेः"।
इति माघः॥

अनृजुः त्रि, (न ऋजुः सरलः, नञ्समासः।) असरलः। शठः। इत्यमरः॥
("न पाणिपादचपलो न नेत्रचपलोऽनृजुः"।
इति मनुः।)

अनृणी, [न्] त्रि, (ऋणं विद्यतेऽस्य, ऋण + इनि ऋणी,नञ्समासः।) अऋणी। अधारी। यथा,—
"एकमप्यक्षरं यस्तु गुरुः शिष्ये निवेदयेत्।
पृथिव्यां नास्ति तद्द्रव्यं यद्दत्त्वा सोऽनृणी भवेत्"॥
इत्याह्निकतत्त्वं॥ ऋणाभावविशिष्टः। यथा यक्ष उवाच।
"को मोदते किमाश्चर्य्यं कः पन्थाः का च वार्त्तिका।
वद मे चतुरः प्रश्नान् मृता जीवन्तु बान्धवाः"॥
युधिष्ठिर उवाच।
"पञ्चमेऽहनि षष्ठे वा शाकं पचति स्वे गृहे।
अनृणी चाप्रवासी च स वारिचर मोदते॥
अहन्यहनि भूतानि गच्छन्तीह यमालय।
शेषाः स्थिरत्वमिच्छन्ति किमाश्चर्य्यमतःपर॥
तर्कोऽप्रतिष्ठः श्रुतयो विभिन्ना
नैको मुनिर्यस्य मतं प्रमाण।